## ।। अथ चत्वारिंशोऽध्याय: ।। Chapter-40

वसिष्ठ उवाच –

ततो गच्छेन्नृपश्रेष्ठ तीर्थं प्रयुतेश्वरम् ।।
चंडीशस्योत्तरे भागे लिंगस्थानं पवर्गदम्[1] ।। १

पुरा प्रयुतमायातंमहर्षिणांमहात्मनाम् ।।
प्रोचुः पूर्वादहमहं[3] चंडीशस्यदिदृक्षया[2] ।। २

नमस्यति च यः पूर्वं श्रीमाले चण्डीकेश्वरम् ।।
स मुनीनां समस्तानामपांक्तेयो भविष्यति ।। ३

इत्थं ते समयं कृत्वा शीघ्रं श्रीमालमागता: ।।
चंडीशायतनात्पार्श्वे स्थितिं चक्रु: समंतत: ।। ४

नमस्कुर्वंति नैशानमपांक्तेयत्वशंकिता: ।।
ध्यायंतस्ते महेशानं जपंत: शतरुद्रियम् ।। ५

अथ तुष्टो महादेव: कृपया परया विभु:[4] ।।
प्रादुश्चकार पुरत: प्रत्येकं लिंगमुत्तमम् ।। ६

ततो दृष्ट्वा समं सर्वे प्रत्यकं लिंगमुत्तमम् ।।
तुष्टुवु: परया भक्त्या पूजयंतो महर्षय: ।। ७

–०–०–

१ ए पयर्गदम्
२ ए चंडीशस्यदिदृक्षया
३ ए पूर्वादिहमंह
४ ए विभू:

अथाकाशगता वाणी तानुवाच मुनीश्वरान् ।।
वरं वृणुत भद्रं वो यदपि स्यात् सुदुर्लभम् ।। ८

महर्षयऊचुः:- यदि तुष्टोऽसि देवेश वरार्ह[1] यदि वा वयम् ।।
एक एव निजं लिंगं तदेतत्क्रियतामिति ।। ६

इत्थं वाक्यविदां तेषां वचनात्ते महेश्वरः ।।
एवमेव चकाराथ लिंगं परमशोभनम् ।। १०

भूयोऽब्रवीन् मुनीन्द्रांश्च राजन् दिव्या सरस्वती ।।
एतल्लिंगं महेशस्य महर्षीणां महात्मनाम् ।। ११

प्रयुतस्य प्रभावाद्धि प्रयुतेश्वरसंज्ञया ।।
भविष्यति भुविख्यातं मर्त्यानां पापनाशनम् ।। १२

एतस्य पूजने नित्यं लिंगप्रयुतपूजनम् ।।
भविष्यति कृतं विप्रा नात्र कार्या विचारणा ।। १३

वसिष्ठ उवाच :- इत्युक्त्वा[2] भारती विप्रान् विरराम नरेश्वर ।।
प्रयुतेश्वरमभ्यर्च्य मुनयोऽप्याश्रमं ययुः ।। १४

----

श्लोक श्लोक

१ ए वराहायदि
२ ए इत्युक्त्वा

एवमासीत् पुरा भूप श्रीमाले प्रयुतेश्वर: ।।
यस्य प्रणाममात्रेण प्रयुतस्य फलं लभेत् ।। १५

देयानि सप्तधान्यानि श्रद्धया तत्र मानवै: ।।
विप्राय वेदविदुषे ततस्तुष्यति शंकर: ।। १६

-०-०-

इति श्री स्कंदपुराणे श्रीमालमहात्म्ये महात्म्य नामश्चत्वारिंशोऽध्याय: ।। ४० ।।